गर्गमनोरमा of गर्गमुनि with the commentary सुकाचि by some anonymous author — Edited and published by Pt. रामकुमार मिश्र at सुधानिवासप्रेस. ~~Loose~~ leaves lithoprint edn., Benares, 1945 Vikram era.

1031

30

20 2008 - 0170

ग॰म॰
टी॰
२०

गर्गमनोरमा समाप्तः

॥श्रीकाशीविश्वनाथपुरीमेमहल्लाठुल्लानारारामकुमारमिश्रकेसुधानेवासछापाषानेमेंगर्गमनोरमा टीकासहितछापागया जिसेलेनाहोयचांदनीचौकमेकन्हैयाकेदुकानपरमिलेगा॥ मि॰ कु॰ ह॰ १ शुक्र॰

सं॰ १९४५

अ ३	क ५	ख ७	ग ९	घ ११	आ १३
ङ १३	उ ११	च ९	छ ७	ऊ ५	ज ३
झ ३	ञ ५	ओ ७	औ ९	ट ११	ठ १३
ड १३	ढ ११	ण ९	त ७	थ ५	द ३
ध ३	न ५	प ७	फ ९	ब ११	भ १३
म १३	य ११	अः ९	अं ७	र ५	ल ३
व ३	ऐ ५	श ७	ष ९	ए ११	स १३
ई १३	ह ११	ऌ ९	क्ष ७	ज्ञ ५	इ ३

अथन्यूनाधिकव्यवच्छेदार्थम् ग्रंथोपसंहारं श्लोकेनाह इतिशब्दसमाप्तिसूचक एवशब्दो निश्चयार्थः ग्रंथांतेसाधुशब्दोपादानंमंगलार्थं साधवेशिष्यायदेयानतुदुष्टायविनयावनतायदीयमाना प्रभवेत्कल्पलतेवसत्फलाय उपकृत्यनुचिंतकानिशास्त्राण्युपकारस्यपदंहिसाधुरेव शिष्यलक्षणंग्रंथांतरादवगंतव्यमितिशेषम्

इत्येवमेकविंशतिभिः श्लोकैर्लोकमनोरमा प्रश्नविद्यामयाप्रोक्तादेयाशिष्यायसाधवे २२ ॥

श्रीलक्ष्मीपतिपादपंकजलवान्ध्यात्वामयाकीर्तिता श्रीगर्गोक्तमनोरमासुरुचिरांटीकां सतांप्रीतये संतुष्यंतुजनाः सदुक्तिविषयांदृष्ट्वास्वतोमूढधीरज्ञानाद्विषयस्यतुल्यतुसदातत्रापिकामेक्षतिः १ प्रोक्तंमयादूषणभूषणंयद्ग्रंथेष्वनेकेषुविविच्यसंतः त्यजंतुगृह्णंतुसदार्थविज्ञाइत्येवविज्ञप्तिमहंप्रयाचे २ शुभं संवत् १९४५ ॥ मि॰ भा॰ शु॰ ११

च्यम् निगानयाहियुक्तार्थमेवंवदन्ति असंबंधभाषयानिगानहेत्वाभावात् षड्ग्नीत्यादिपाठः प्रामादिकएवकिंच भग
वता सर्वत्रशेषवच्छब्दतः प्रश्नकथितत्वादत्रलब्धिग्रहणेनकालकथनंसर्वथान्यथैवापरोक्तेरन्यथाब्रूयात् यः परो
क्तोपदूषयेत् तस्यैवदूषणंतद्धिनदोषोतोन्यदूषणइति अत्रान्यत् पाठान्तरमपिकेरलसंदृष्टंतच्च उक्तंच गर्गेणेत्याऽ
क्रम्यकोष्ठध्रुवघ्नेपिंडेतुवेदांगैर्गुणयेत् ततः भजेद्दृष्टाब्धि ४८ भिः शेषात् द्रव्यकोष्ठंमनीषिभिरिति अर्थःस्पष्टः द्रव्य
ज्ञानेकोष्ठध्रुवमाह सएव रेखाः सप्तोर्द्ध्वगाः कार्यानवतिर्यक्तथालिखेत् अष्टाधिकाश्चत्वारिंशत् कोष्ठकास्युस्तथा
क्रमात् अकारादीन्विसर्गान्तश्चतुष्कोणेतथालिखेत् ककारादींस्तथावर्णाल्लिखेच्छेषेबुधः क्रमात्कृशानु ३ सा
यका ५ सप्त ७ नव ९ शर्वा ११ स्त्रयोदश १३ अन्वयव्यतिरेकाभ्यांसर्वत्रपूरयेत्सुधीः प्रश्नाद्यक्षरतोज्ञेयंकोष्ठकं
कंमनीषिभिरिति अत्रोदाहरणम् अत्रनिधिर्वानवेतिप्रश्नेदाडिमेत्युक्तेदकारस्य त्रयोध्रुवकस्तेनगुणितेपिंडः ४९९२
अष्टचत्वारिंशताभक्तास्तत्रशेषः ४८ अतोऽष्टचत्वारिंशतिप्रमितिचक्रमिति भूमिंषष्टचत्वारिंशतिखंडकान्कृत्वा
ईशानादिक्रमेणगणनात् यः शेषमितखंडस्तत्रद्रव्यमस्तीतिवाच्यमित्यलम् ॐ नमोभगवतेगर्गायाशेषायसतत् २१॥

९।१४ अतश्चंद्रदशायांभौमांतरम् तस्यभुक्तवर्षादि ०।९।१४ भोग्यवर्षादि ३।३।८ एवंसर्वत्रदशावदेदिति केरलसंग्रहेद्रष्टव्य।
म् अस्य फलंतुशुभदशाशुभापापदशा ४ शुभा उक्तंच भट्टोत्पलभोजराजचण्डेश्वरादिभिः सौम्यस्ययदाभवेदुदयोकार्य।
प्राप्तिः प्रष्टुर्वक्तव्यानेतरैर्भवतीतिसौम्यग्रहेकार्यसिद्धिर्नतुपापग्रहोदयेइति शुभवर्गोभवेद्यदितदाचिंतितकार्याणांसिद्धिः।
पापेतदन्यथेति यथाशुभग्रहदशायांशुभस्यान्तरम् उत्तमम् शुभदशायामशुभस्यान्तरम्मध्यमम् अशुभदशायामपिम
ध्यमं अशुभेशुभांतरम् मध्यमदशाफलम् संहितोक्तवद्गेयम् ग्रंथवाहुल्यान्नोलिखितम् अत्रहरिभक्तादयस्तुशुभे।
शुभांतरेउत्तमं शुभाशुभांतरेमध्यमोतमम् पापेशुभांतरेमध्यमम् पापेपापान्तरे अधमंइत्याहुः एकग्रहस्यसदशफल
योर्विरुद्धनान्यवेदद्धिकंपरिपठ्यतेतत्तदित्युक्तत्वात्सौम्यपापयोरुभयत्राजागरूकत्वान्मध्यमोत्तममित्यस्यमूलम् मृग्य
शुभाशुभयोर्विरोधित्वात् अत्रविशेषः केरलचंद्रादौद्रष्टव्यइत्यलम् अत्रभट्टास्तुपिंडेषडग्निः ३६ संयुक्तेचंद्रांगैर्भा।
गमाहरेदितिमूलम् मत्वापिंडेषडग्नि ३६ युक्तेचंद्रांगै १७ र्भक्तेयल्लब्धंसस्वावधिकालइत्याहुस्तेषांमतेकिमात्मः
कालः भगवताकुत्रापिक्षिप्यांकल्प्यतेमानाभावात् नचनिगानर्हस्यवचनमेवप्रामाण्यम् पिंडेषडग्निसंयुक्ते इत्यादीतिवा

॥ अथांतर्द्दशाचक्रं केरल संग्रहात् ॥

सू	चं	मं	बु	बृ	शु	श
०	१	०	०	०	०	६
४	५	११	७	६	२	२
६	३	२५	१८	५	१६	१६

चं	मं	बु	बृ	शु	श	सू
६	४	२	२	०	३	१
२	१	७	४	७	३	५
१६	१०	९	११	८	०	२२

मं	बु	बृ	शु	श	सू	चं
०	०	०	०	०	०	४
०	०	०	०	०	११	१
०	०	०	०	०	२५	२०

बु	बृ	शु	श	र	चं	मं
०	०	०	०	०	२	०
०	०	०	०	७	५	०
०	०	०	०	१८	७	०

बृ	शु	श	र	चं	मं	बु
०	०	०	०	२	०	०
०	०	०	०	४	०	०
०	०	०	०	११	०	०

शु	श	र	चं	मं	बु	बृ
०	०	०	०	०	०	०
०	०	२	०	०	०	०
०	०	१६	०	०	०	०

श	र	चं	मं	बु	बृ	शु
०	३	०	०	०	०	०
९	३	०	०	०	०	०
९	०	०	०	०	०	०

नच्छलेनदशाप्युक्तातद्यथा ॥ योशुद्धस्तस्यैवंदशाशेषंवर्षादिभुक्तादशास्वध्रुवकेशुद्धाभो॥ग्यदशा अथांतर्द्दशाचक्रं केरलसंग्रहात् अत्रोदाहरणं अशुद्धश्चंद्रः शेष ७ मतश्चंद्रदशायाम् सप्तवर्षम् अंतरज्ञानंतु चंद्ररतं ६।२।१६ शुद्धंशेषम्

म भवेच्च सप्तभिर्बुधैः ७ शेषतुल्योत्रवारः स्याच्छुक्लकृष्णादिभेदतः शुक्लकृष्णक्रमेणैव गणयेद्गुरु शुक्लतः लब्धं मूले पुन
श्री र्योज्यं षष्टिभिर्विभजेत्ततः शेषतुल्यात्र घटिका विज्ञेया सर्वदा बुधैः पक्षेशरेन्दुभि १५ र्भागैर्मासेद्द छेऽर्क १२ तो भजेत् व
१७ र्षे दृष्टे शतैर्भागो शेषं पूर्वोक्तमेव च एवं कालस्य विज्ञानं मया सम्यक् प्रकीर्तितमिति प्राप्ते पक्षे विशेषदर्शनार्थमुदाहर
णम् पिंडे द्वाभ्यां भक्ते शेष २ मतः कृष्णपक्षः तत्र लब्धिः ८३१ युक्त पिंडे २४९५ पंचदशभिर्भक्ते लब्धिः १६६ शे
ष ५ मतः पंचमी तिथिः लब्धियुतपिंडे १८३० सप्तभक्ते लब्धिः २६१ शेष ३ मतः कृष्णपक्षत्वात् शुक्लतो गणनया
सूर्य्यवारः लब्धियुतपिंडे १९२५ षष्टिभक्ते लब्धिः ३२ शेष ५ मतस्तत्तुल्या घटी ५ लब्धियुतपिंडे १६९६ ष
ष्ट्याप्ते शेष १६ मतस्तुल्यानि पलानि १६ एवं गणिते निष्पन्नाः पक्षादयो यथा कृष्णपक्षः २ पंचमी तिथिः ५ सूर्यवा
रः ३ घटी ५ पलानि १६ एवं वर्षादिप्राप्तेपि ज्ञेयम् अत्रोत्पलभट्टः उदयोपगतो राशिस्तल्लिप्तिका गुणयेत् छायां
गुलैः पृथक् स्थो हृत्वा मुनिभिः स्ततः शेषं ग्रहगुणकारो ज्ञेयो दैवविदा पंच ५ विंशतिः सैका २१ मनवो १४ गो९
ष्टौ ८ त्रितयं ३ भवा ११ सूर्यादितो ज्ञेयं गुणयित्वैवं प्राग्वत् घृत्या सौम्यस्य यदि भवेदुदयम् कार्यप्राप्तिः प्रष्टुर्वक्त
व्यानितैर्भवन्ति गुणकारैः ७१ एकसप्तति विभक्तः कार्यः सूर्यादिगुणक संशुद्धः यदा न शुद्ध्यति वर्गो विज्ञेयस्तद्दशांका

क्रमाद्ध्रुवाः अत्रोदाहरणम् पिंडे १६६४ रसघ्ने ९९८४ अष्टयुक्ताः ९९९२ सप्तभक्तेशेष २ मतश्चंद्रस्तस्यध्रुव
केण २१ गुणितेपिंडे ३४९४४ चं १२ द्वांगैर्भक्तेशेषं १२ तस्मिनसूर्यध्रुवःशुद्धस्तुद्धस्ततः शेषम् ७ अशुद्धश्चं
द्रस्यान्ततः पक्षपरिमिता अवधिः उक्तंच आरदिवाकरशेषेदिवसाः पक्षाश्चशुक्रेब्दोः मासागुर्वशेषेसौम्येऋतवः

लब्धांकादवधिर्ज्ञेयाप्रश्नकालेमनीषिभिः २१

शनैश्चरेव्दास्युः आधानेशत्रुजयेलाभालाभेगमागमेरुजिवा कालंकार्येप्रवदेत्सर्वत्रै
वसदाविद्वानिति अत्रावधिज्ञानेविशेषोक्तप्रश्नसंग्रहे दिनेदृष्टेतुयल्लब्धमूलेयोज्यं।
वराग्निभिः ३० विभजेद्दिवसोवाच्यः शेषतुल्योत्रसूरिभिः लब्धमूलेपुनर्योज्यंतुभवेतस

न्यासः

सू	चं	मं	बु	बृ	शु	श	ग्रहाः
५	२१	१४	९	८	३	११	ध्रुवाः

॥अथांतर्दशाचक्रं केरल संग्रहात् ॥

सू	चं	मं	बु	बृ	शु	श
०	१	०	०	०	०	६
४	५	११	७	६	२	२
६	३	२५	१८	५	१६	१६

चं	मं	बु	बृ	शु	श	सू
६	४	२	२	०	३	१
२	१	७	४	७	३	५
१६	१०	९	११	८	०	२२

मं	बु	बृ	शु	श	सू	चं
०	०	०	०	०	०	४
०	०	०	०	०	११	१
०	०	०	०	०	२५	२०

बु	बृ	शु	श	र	चं	मं
०	०	०	०	०	२	०
०	०	०	०	७	५	०
०	०	०	०	१८	७	०

बृ	शु	श	र	चं	मं	बु
०	०	०	०	२	०	०
०	०	०	०	४	०	०
०	०	०	०	११	०	०

शु	श	र	चं	मं	बु	बृ
०	०	०	०	०	०	०
०	०	२	०	०	०	०
०	०	१६	०	०	०	०

श	र	चं	मं	बु	बृ	शु
०	३	०	०	०	०	०
९	३	०	०	०	०	०
९	०	०	०	०	०	०

नच्छलेनदशाप्युक्तातद्यथा ॥ योशुद्धस्तस्यैवंदशाशेषंवर्षा दिभुक्तादशास्वध्रुवकेशुद्धाभो । ग्यदशाअथांतर्दशाचक्रंकेर । लसंग्रहात् अत्रोदाहरणं अशुद्धश्चंद्रः शेष ७ मतश्चंद्रदशायाम् सप्तवर्षम् अंतरज्ञानंतु चंद्ररतं ६।२।१६ शुद्धंशेषम्

षेपरदेशजंकल्पनाभिः प्रश्नकर्तुरालोपेप्य अन्यदपिचिंतयेत् धीमानितिशेषः उदाहरणम् भक्ष्यज्ञानेयाल्लब्धि १२४ स्वया
युतेपिंडे २९११ द्वाभ्यांभक्तेशेष १ मतः स्वदेशजइतिकेरलसंग्रहे स्वदेशजोऽन्यदेशोन्योद्वाभ्यांभक्ते वदेत्सदा सदाशब्दोपाद
नं स्वदेशजपरोक्षजविचारस्तत्रप्रश्नेस्थितिसूचनार्थमस्योत्तरेकथनमन्यथाधातुभेदैः अस्यकथनस्ययोग्यत्वात् अतएवइति
स्पष्टार्थमाह केरलचंद्रः स्वदेशजंपरोक्षंचस्थूलसूक्ष्मंतथापरं प्रश्नत्रयेविनिर्दिश्यंसुगंधंदुष्टगंधकमिति प्रश्नत्रयशब्दोधातु
जीवमूलपरः नचधातुषुगंधत्वाभावात्कथंगंधस्यप्रश्नत्रयेसंभवइतिवाच्यं धातोः पृथ्व्यांशत्वात्पृथ्व्यांतस्यसमवायसंबंधेनस

स्वदेशजंपरोक्षंचकल्पनाभिर्विचिंतयेत् ॥

त्वात् अतएवपृथ्व्यांधातुत्वाद्गुपरिग्रहेगंधपरीक्षातच्चकारिकायां घृतासृग्भमद्यानांगंधाः सद्भिप्रज्ञोवदेति नारदः मधुपेरान्न
पिशितगंधवर्णानुपूर्वकमित्यादिपेरगंधः रसोऽपिपृथिव्यांसमवायसंबंधेनसत्वात् रसगंधयोर्गुणत्वादतएवभूग्रहणेरसपरीक्षा
प्युक्तानारदः मधुकंकटुकंतिक्तंकषायंचरसाक्रमादित्यादि अन्यदप्याहकेरलचंद्रः वर्णोलघुगुरुचापिसर्वप्रश्नेवदेत्सुधीरित्यादि
षुजलस्यासंभवाज्जलचिंतायांतस्यज्ञानंदुर्घटं एवंतेजोवाय्वाकाशानामपिइतिचेदुच्यते अत्रभगवतायथाभागेः कल्पनाइत्यु

र्ध्य द्वाभ्यांभक्तेशेष १ मतोभक्ष्यम् उक्तंच संग्रहचूडामणौ मूलंतुपंचधाभिन्नंपंचभिर्भागमाहरेत् वृक्षवल्ल्योषधंचैवतृणगुल्मादिकं
तथेति वृक्षाः अश्वत्थोन्यग्रोधश्चूतजंवुकादि लताः द्राक्षापिप्पलिकाचूलीकुष्मांडीत्रपुकीतथेत्यादि ओषध्यः फलपाकांताइ
त्यमरः फलपाकएवांतोयस्याः साइतिकदल्यादयः तृणम् दूर्वाचकुशकाशेत्यादि गुल्माः मालतीमातुलुंगाश्चपद्मिनीकेतकोइ
त्यादि आदिशब्दस्तेषामपिभेदसूचनार्थमितितेषांवहुभेदास्तुग्रंथवाहुल्यभयान्नोच्यंते चूडामणिकेरलागमाभ्यांवोध्यम् केरला
गमे मूलराशौद्विभागेनआर्द्रशुष्कक्रमेणवै चूडामणौ एकेनतुभवेद्भक्ष्यमभक्ष्यंशून्यशेषतः अन्यदप्याहचूडामणिः भक्ष्याणिष
ट्प्रकाराणिभागस्तावद्भिरेवहि तिक्तंकटुकषायंचमधुरंक्षारमम्लकं सुगंधिगंधहीनंचक्रमाद्भेयाद्विभागतः भक्ष्यंपुनर्द्विधामिश्रं
द्वाभ्यांभागेसमाहरेत् एकेनशोभनाहारंशून्येचैवविदूषितम् खाद्यंपानंतथालेह्यंचोष्यंचवेदभाजिते भक्ष्याभक्ष्यंजीवेपिज्ञेयम्
अनउक्तंचूडामणौ अभक्ष्येपिद्विभागेनसुगंधिगंधहीनकमिति अत्रगंधहीनशब्दोदुर्गंधपरोऽन्यथा पृथिव्यांगंधस्यसमवायसं
वंधेनसत्वात्तस्यदुर्घटत्वापतिः स्यात् अतएवकेरलसंग्रहे सुगंधपूतिगंधचद्वाभ्यांभक्तेवदेद्बुधः इति पूतिगंधसुदुर्गंधइत्यमरसिं
हः परेतुसुगंधोव्यक्तगंधपरः हीनगंधशब्दोऽव्यक्तगंधपरइतिवर्णयंति व्यक्ताव्यक्तंतुगंधस्यद्वाभ्यांभक्तेविनिर्दिशेत् इतिकेरल।
चंद्रवदनादिरिति ग्राम्याग्राम्यादिजीवोक्तवद्ज्ञेयमितिदिक् १६ ॥ ॥ ॥ ॥ ॥ ॰
अथान्यद्रव्यज्ञानार्थं सप्तदशस्यपूर्वार्द्धमाह लब्धांकयुतेपिंडेयथाभागेस्तुकल्पनेन्युक्तरीत्याद्वाभ्यांभक्तेएकशेषेस्वदेशजंद्विशे

हनाख्येन केनचिद्गर्गवंशजातेन मुनिना विचारितः अनुभवः कृतः एतदुक्तं अनुभवे सति मूलोक्तोपि न ग्राह्यः अनुक्तमपि गृण्ही।
यादिति कोवानुभव इति केचित् वृद्धाम्नायस्तच्च समच्छेदे तु जात्येकोपूर्वोक्तक्रमतः सुधीः लब्धांकं पिंडके क्षिप्त्वा ततो वैभागमाह
रेदिति कारिकायामस्यार्थः एकजातौ समभाजकत्वे पूर्वोक्तस्यायनं कृत्वागतो लब्धिः पिंडांके क्षिप्य ततो भाजकेन भजेदिति अन्यच्च पिंड
मयोगाद्विज्ञेया घटिता घटितेः पिचेति वस्तुतो भगवता यथाक्रमविभागेन मूलमिश्रेणैवेतया इत्युक्तत्वाद्वेदज्ञाने अनुवर्तनसंभवे हेर
मात्रेयथाक्रमविभक्तलब्धिः पिंडांके योज्यमिति तथाचोदाहरणम् पिंडे १६६४ षड्भिर्भक्ते शेष २ मतः काष्ठं लब्धिः २७७ पिंडके।

षड्भिर्भक्ते विजानीयात्तत्र विद्याविचक्षणैः १५ तरवश्च लतौषध्यस्तृणं गुल्मादिकं तथा शुष्कमार्द्रं तथा द्वाभ्यां भक्ष्याभक्ष्यं तथैव च १६ ॥

क्षिप्ते १९४१ षड्भिर्भक्ते शेष ३ मतः पीतवर्ण इति एवं सर्वत्र वृद्धाम्नायवशा
द्धेयमिति दिक् समच्छेद शब्दो त्र वृद्धवचने ऽनुवर्तनसंभवच्छेदपरः अतः प्रोक्ते शंगि प्रश्ने ग्रामारण्येज्ञानार्थे पुनः पिंडे द्वाभ्यां भक्ते भाज।
के तुल्यत्वात् शृंगिणि वन्यत्वस्यैव संभवापत्तिरिति शंका न संभवतीति सर्वमनवद्यम् १४।१५ अथ काष्ठभेदज्ञानार्थं षोडशसूत्रमाह॥
यथाभागे कल्पना संभवात् पिंडे पंचभिर्भक्ते शेषवशात् तरवादिज्ञेयं पुनः पिंडे द्वाभ्यां भक्ते शेषतः शुष्कादि लब्धयुत पिंडे द्वाभ्यां भक्ष्यादिज्ञे
यं उदाहरणम् पिंडे १६६४ पंचभि ५ भक्ते शेष ४ मतस्तृणं पुनः पिंडे १६६४ द्वाभ्यां भक्ते लब्धिः ८३१ शेष २ मतः आर्द्रं लब्धिः पुनः पिंडे २५

मिश्रेणेति मूलशब्दोपात्तः विकृतपिंडस्य मूलत्वाभावात् पुनः पिंडे १६६४ त्रिभिर्भक्ते शेषमतः २ काष्टजः पर्वतवासी पुनः पिंडे द्वाभ्यां भक्ते शेषमतो ऽयोनिजः पुनः पिंडे १६६४ गजभक्ते शेष ८ मतो वंधइति अत्र केचित् लूका प्रश्नतयाचार्येणोक्तमित्याहुस्तथापि केशास्तृगित्यादि वक्ष्यमाणसूत्रस्यात्रैव लेखनयोग्यत्वाच्चेति पाठ्यं भवतु तत् १३ ॥ अथ मूले प्राप्ते तस्य भेदज्ञानार्थं चतुर्दश पंचदश सूत्रे आह प्राप्ते प्रश्ने पिण्डे षड्भिर्भक्ते शेष १ मतो मूलं काष्ठमित्यादि ज्ञेयम् तत्र वर्णज्ञानार्थं पिंडे षड्भिर्भक्ते एकशेषे श्वेतमित्यादि प्रश्नविद्याविचक्षणैर्विजानीयादिति उदाहरणं पिंडे १६६४ षड्भिर्भक्ते शेष २ मतः काष्टं नन्वत्र भाजकस्य तुल्यत्वात् प्राप्ते मूले श्वेतः काष्ठ रक्त इत्येव

मूलभेदान् प्रवक्ष्यामि यथोक्तं शंभुना पुरा मूलं काष्ठं त्वचापत्रं पुष्पं चैव तथा फलं १४ श्वेतं रक्तं तथा पीतं कृष्णं चित्रं हरीतकं ॥

२१ संभवति लोके तु मूले ऽपि रक्तादिवर्णा दृश्यंते इति चेच्छृणु यस्य भेदोपेक्षितस्तदक्षरसंख्याकं पिंडे क्षिपेदिति केचित् लब्धांकं पिंडे क्षिप्त्वा ततो भक्ते श्वेत रक्तादिकं ज्ञेयमिति वृद्धाम्नायः परंतु शेषं शेषं क्षिपेन्मूले यावत्सर्वंसमाप्यं इति चूडामण्युक्तत्वाद्भेदज्ञानार्थं शेषं पिंडे क्षिपेदिति भेदज्ञाने षुदेवे शिलब्धांके भाग माहरेदिति केरलागम श्चेत्याशंक्याह केरलसंग्रहाख्यः उक्ते प्यनुक्ते मूलांके तद्वज्ज्ञेयं सदा बुधैः सानुभूत्या विशेषोयं मोहनेन विचारित इति पूर्वाम्नायकर्तृणां वचनदर्शनादस्य व्यवस्था प्रथमस्यार्थः मूलस्यासावंक कस्मिन्नुक्ते वानुक्ते तद्यथा तथ्यं सानुभूत्यानुभवेन बुधैः सदा ज्ञेयम् अयं विशेषो मोहनेन मो

द्वादशभिर्भक्तेएकशेषे १ तनुरित्यादिभावमाह वराहः होरादयस्तनुकुटुंवसहोत्थवंधुपुत्रारिपत्निमरणानिशुभास्पदायाः रिफाख्या
इत्यादि तन्नद्भावस्थानेविचारकारणंसर्वेषांचिंतनंज्ञेयमिति कल्पस्वविक्रमगृहप्रतिभाक्षताानिचोक्तानिरंध्रगुरुमानभवव्ययानीत्या
दि संहित या अवगंतव्य उदाहरणम् पिंडः १६६४ द्वादशभिर्भक्तेशेष ८ मनोमरणाच्चिंतास्ति १२ अथान्यदत्रभेदवाहुल्यान्मयानोक्त
मितित्रयोदशसूत्रेणाह स्पष्टार्थउक्तंचभास्कराचार्येण स्वल्पांतरत्वाद्वहुपयोगात्प्रसिद्धभावाच्चवहुप्रयासात् ग्रंथस्यतद्वैगुरुताभये
नयस्त्यज्यतेऽर्थोनसदूषणाय इति तथाचचतुष्पदृष्टेचूडामणिः खुरीनखीतथादंतीशृंगिणोवेदभाजिते द्वाभ्यांखुरिणिसंदृष्टेग्राम्यारण्य
भक्तेद्वादशभिश्चैवभावसंवंधचिंतनं १२ अन्यव्यक्तिभवोभेदोनास्माभिस्तुप्रकथ्यते ग्रंथवाहुल्य भीत्याचज्ञे
यमन्यत्रतः सदा १३ ॥
९९ पशुस्ततः नखिनश्चयदादृष्टाद्वाभ्यांग्राम्यवलंभवेत् दंतिष्वेवंशृंगिणिचद्वाभ्यांस्थलंजलंव
देत् कृमिजः काष्ठजः कीटः त्रिभिः शेषेक्रमाद्वदेदिति केरलागमेच तरुपर्वतग्रहादिवासिनः कर्मयोनिजाइतित्रिभिर्भक्तेतरुवासिनइत्या
दिद्वाभ्यांभक्ते कर्मजइत्यादिवर्णागमे आयुराज्यंतथाविद्याविरोधोमित्रसंगमः इष्टंचमरणंवंधगजभक्तेविनिर्दिशेदिति उदाहरणम् १६
६४ चतुर्भिर्भक्ते ४१५ शेष ४ मतोशृंगिणः पुनः सलब्धपिंडे २०७९ द्वाभ्यांभक्तेशेष १ मनोग्राम्यचारीपुनः सलब्धपिंडे २७०३ द्वाभ्यांभ
क्तेशेष १ मनः स्थलचारी अत्रकेचित् लब्धिलब्धंतस्मिन् पिंडेकवर्तितदृष्टपिंडेइत्याहुस्तत्तुप्रश्नसंग्रहादिविरुद्धं अतएवभगवन्नामूला ६

रस्सश्चाब्धिगा विभाजिते इति ब्राह्मणोपि चतुर्भागं क्रमेणागमकं वदेत् ब्रह्मचारी गृहस्थाश्च वानप्रस्थो यतिस्तथा चतुर्धा यतयः प्रोक्ता
श्चतुर्भिर्भागमाहरेत् हंसाः परमहंसाश्च बहूदककुटीचरा इति ——————— पंचभिर्भक्ते पंचशेषे म्लेछमित्यु
क्तं तस्य चतुर्वर्णादृष्टत्वात्प्रथमतो ब्राह्मणाः चत्वारो वर्णाः सृष्टास्तस्मादखिलजातयः इति श्रुतिस्मृतिप्रमाणात् उक्तंच केरलागमे चतु
र्भक्ते विजानीयाद्वर्णं वै ब्राह्मणादयः इति १० अथ गौरादिज्ञानार्थं एकादशसूत्रमाह पिंडे त्रिभिर्भक्ते एकशेषे गौरः द्विशेषे २ श्याम
स्त्रिशेषे ३ रक्तः एवं दीर्घशिशुत्वादयः खर्वो ह्रस्वश्च वामन इत्यमरः उदाहरणम् पिण्डः १६६४ त्रिभिर्भक्ते शेष २ मतः श्यामवर्णः ल

गौरः श्यामस्तथा रक्तो दीर्घो मध्यश्च खर्वकः शिशुर्युवा तथा वृद्धस्त्रिभिर्भक्तेऽभिजायते ११ नरस्त्रियो च द्वि
विधं चत्वारश्च क्रमादिमे ॥ ८६ ब्धिः ५५४ पिण्डक्षिप्त्वा २२१८ त्रिभिर्भक्ते शेष १ मतो दीर्घः लब्धिः ७३९ पिण्डक्षिप्त्वा २
४०३ पिंडे त्रिभिर्भक्ते शेषं ३ अतो वृद्ध इति उक्तंच केरले बालं युवानं वृद्धं च गौरं श्यामं च रक्तकं दीर्घं मध्यं वामनं च त्रिभिर्भक्ते क्रमाद्वदेत् इ
दं देवादीनामपि ज्ञेयं ११ ॥ पिंडे द्वाभ्यां भक्ते एकशेषे नरः द्विशेषे स्त्री इमे पूर्वोक्ता देवाद्याश्चत्वारो नरस्त्रियौ ज्ञेयाविति अनेन जीववर्गे समा
नमिति सूचितमिति केचित् अत्रोदाहरणम् पिण्डः १६६४ द्वाभ्यां भक्ते शेषमतः स्त्री उक्तंच द्वाभ्यां भक्ते विजानीयान्नरनार्यौ यथाक्रमा
दिति अत्र नरस्त्रियो च द्विविधमित्यत्र पंचमाक्षरस्य गुरुत्वाच्छंदोभंगस्त्वार्षः अथ भावसंबंधिप्रश्नज्ञानार्थं द्वादशार्द्धसूत्रमाह पिण्डे

उदाहरणम् पिंराडः १६६४ चतुर्भिर्भक्ते ४ शेष ४ मतो वृश्चिकादि उक्तंच केरलागमे चतुस्तष्टे क्रमाज्ञेया द्विपदस्तुर्यपादकाः द्विपदो व-
हुपदा इति अत्र चूडामणिकारस्तु जीवचिंतायदादष्टाभागंपंचभिराहरेत द्विपदश्च चतुष्पाच्च अपदाः पादसंकुलाः एकपादेति विख्यातं
शेषं मूले विनिःक्षिपेदिति एकपादो शब्दः गंधर्वराक्षसादिपर इति एकैकपादानां तेषु सत्वादिति यावत् तथापि वक्ष्यमाणीय द्विपद निरूप-
णे राक्षसस्य वक्ष्यणीयत्वादाचार्येणाचत्वार्युक्तान्यतो न दोषः ९ ज्ञाने द्विपदे देवादिज्ञानार्थं दशमसूत्रमाह प्राप्ते द्विपद प्रश्ने पिंडे चतुर्भि-
र्भक्ते एकशेषे देवेत्यादि स्पष्टम् उदाहरणम् लब्धयुत ४१५ पिंडे २०७९ चतुर्भिर्भक्ते शेषः ३ पक्षिरिति अत्र चूडामणिः द्विपदे चैव दृष्टे-

चतुर्भिर्भाजिते शेषे विज्ञेयाः सर्वदा बुधैः ९ देवता मनुजाश्चैव पक्षिणो राक्षसास्तथा चतुर्भिरेव ज्ञातव्या भा-
जितशेषतः क्रमात् १० ॥

९ तु चतुर्भिर्भागमाहरेत् देवा पंचजनाश्चैव पक्षिणः स्तारकाः क्रमादिति अत्राचार्येण देवतारक-
योरभेदत्वं सूचितं देवज्ञाने विशेषज्ञानमुक्तं चूडामणौ देवाश्चतुर्विधाः प्रोक्ताश्चतुर्भिर्भागमाहरेत् कायस्था भुवनस्थाश्च ज्योतिषः पितर-
स्तथा इति अत्र लब्धांक ५१९ युतपिंडे २१८३ चतुर्भिर्भक्ते शेषः ३ ज्योतिषः कायस्था ब्रह्माद्या भुवनस्था इंद्रादयः ज्योतिषः सूर्याद-
यः पितरः कव्यवाडनलादय इति वस्तुतस्तु अत्र एव शब्दोपादानेन देवादीनां चतुर्णां चत्वारो भेदा इति सूचितं अत एवोक्तं केरलसंग्र-
हे चूडामणौ ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा जातिरिति क्रमात् जलगाः स्थलगाश्चैव खचराः सर्वगा इति ब्रह्म १ देव २ सिद्ध ३ ॥ ४ ॥

तशुद्धाज्ञेयाः पात्रेत्रिशेषवशात्तोदेवपितृकर्मोपयोगीस्वपतद्गृहादिपात्राणियानीति तदुक्तंवैदिकेसद्यपरिष्कृतशुद्धाधातवस्त्रिवि
धामता इतिपात्रेधर्मार्थकाममोक्षोपयोगिभेदास्त्रिधामताइतिच ७ अथाधाम्येधातौविशेषनिर्णयार्थंसार्द्धमष्टमंसूत्रं अधाम्येसति
विपश्चितापंडितेनपिण्डेदशभिर्भागोदेयः एकशेषे १ मृत्तिकाद्विशेषे २ अंजनंत्रिशेषेपाषाणःचतुर्भिर्हरितालंपंचभि ५ र्मनःशिलाषड्भि
र्मरकतंसप्तभिः ७ पद्मरागं अष्टभिः ८ प्रवालंनवभिस्तारं ९ तारंरौप्यंचमुक्तायामितिविश्वः अत्राधाम्यत्वान्मुक्ताग्राह्यादशभिः १० रत्नंउ
दाहरणम् दशभिर्भक्तेशेष ४ मतोहरितालं ननुअस्यश्लोकस्यमूलत्वेकिंमानंटिप्पणकारेणव्याख्यानंकृत्वा अन्यग्रंथांतरेप्यधाम्येन

अधाम्येदशभिःपिंडेभागोदेयोविपश्चिता मृत्तिकांजनपाषाणंहरितालंमनःशिला मर्कतंपद्मरागंचप्रवा
लंतारंरत्नकं ८ द्विपदस्तूर्य्यपादश्चविपदः पादसंकुलाः ॥

९ वभेदाउक्ताइतिचेद्ग्रंथांतरादिष्वप्यधाम्येनवभेद
मात्रसत्वेमानाभावात् श्रीभगवदुक्तस्यास्यश्रुतिरूपशास्त्रस्ययेषांप्रत्ययोनास्तीतितेधन्याःउक्तंचकेरलचूडामणिसारे मृतिकांजनपा
षाणहरितालमनःशिला शर्करामर्कतंवज्रपद्मरागंप्रवालकं मौक्तिकंचेतिविज्ञेयादशकेरलविद्बुधैरिति तथाच श्रुतिस्मृतिरूपस्यशा
स्त्रस्यप्रत्ययोनैव ज्ञायतेयेषांतेवैसदाज्ञेयामहापातकिनःखल्वाइति ८ ॥ अथजीवेपादज्ञानार्थंनवमसूत्रं जीवेजीवप्रश्नेपिण्डेचतुर्भि
र्भाजिते एकशेषेद्विपदोदेवाद्याःद्विशेषे २ तुर्य ४ पदोगवादयःत्रिशेषेविपदः सर्पाद्याश्चतुःशेषेबहुपदो वृश्चिकाद्याःबुधैःसदाज्ञेयाः

नम नमस्कारेणजीवत्वमितिस्कंदपुराणेउक्तत्वात् किंविशिष्ठं आनंदरूपं नंदयतिजीवानितिपचाद्यच्च आसमंता
द्धर्षोत्कर्षोदितानंदयतीत्या नंदस्त देवरूपंयस्येत्यावाङ्मनसगोचरम् चक्षुषारूपाणिपश्यंतीतिश्रुतिवाक्यल्लोकानुभवसि
द्धिभ्यामवाङ्मनोगोचरेकथरूपमितिपदंदत्तमित्यतआह गुरूक्तवर्त्मनावीतरागाणांनिश्चयात: करणवृत्तिरूपायाधी: त
देवचक्षुषासद्रूपंदृश्यतऽ स्तद्भासकंनित्यशुद्धबुद्धस्वभावंप्रत्यक्चैतन्यमेवात्मतत्वमानन्दरूपमितिवेदान्तविदुषामनुभवसि॥
द्धं सच्चिदानन्दाद्वयंब्रह्मेतिश्रुतिश्चपुनः किंविशिष्टंआनन्दैकनिकेतनं आनन्दःसायुज्यापवर्गस्तस्याद्वितीयंधामक्षीयंतेचा

प्रणम्यानन्दरूपंतमानंदैकनिकेतनं गर्गोबुद्धिमतांप्रीत्यैप्रश्नविद्यामथाकरोत् १ वर्गव
र्णप्रमाणांचसस्वरंताडितंमिथः ॥

ऽस्यकर्माणितस्मिन् दृष्टेपरावरे नसपुनरावर्तनंइतिच कस्मैप्रयो
जनाय बुद्धिमतांप्रीत्यै बुद्धिर्निश्चयात्मिकांतः करणवृत्तिस्तद्वतांसुजनानांप्रीतये सर्वमनवद्यम् १ अथप्रश्नविद्योपयोगा
र्थंपिंडांकसाधनोपायेकारणसूत्रंप्रथमम् वर्गाश्चवर्णाश्चतेषांप्रमाणंसस्वरं तनहूर्णाधारस्वरैः सहितंवर्गवर्णप्रमाणंचमिथः
परस्परंताडितंगुणितंयत्तस्यपिंडसंज्ञाभवेत् तस्यपिंडस्ययथाभागैर्वक्ष्यमाणप्रकारस्त्वव्ययादनुक्तेर्याद्दक्प्रश्नकर्तुरीप्सानाद्द

ग्भागेः कल्पनाकार्येकेषांवर्गवर्गास्वराग्राह्याइत्यतउक्तं केरलभाष्ये प्रागुदङ्गुखप्रदृर्वाग्रुन्यकुसुमाक्षरं गृहीत्वाप्रश्नवि
द्यायांफलंज्ञेयमनीषिभिरिति अथोदाहरणं दाडिमंतत्रदंडम् एषांवर्गांकाः ५।४।६ वर्णांकाः२।३।५ प्रमाणं ८।७।११।
२६ आईआएषांस्वरांकाः २।३।१ युक्तंवर्गवर्णप्रमाणं ३२ मिथस्ताडितम् १६६४ तस्यपिण्डसंज्ञाजाता अत्राल्पमेधसां
वर्गवर्णप्रमाणज्ञानार्थंपूर्वाचार्यैः संपादितम् पद्यम् रागावेशंनसहधा २।३।४।५।६।७।८।९ अवर्गाद्याः क्रमादमीवर्गांका
श्चैकवृद्ध्यानुवर्गवर्णेष्यनुक्रमात् अस्यार्थः क्रमात् अमीअवर्गाद्याःअंकाउक्ताइत्यन्वयः अमीतिके कटपयवर्गभवैरिह

पिंडसंज्ञाभवेत्तस्ययथाभागेस्तुकल्पना १

पिण्डान्त्याक्षरैरंकाःइतिशिवतांडवसूत्रात्सिद्धाः रागावेशंनसहधाः अंकाः अकचटतपयऽशानांवर्गाणांवर्गांकाः कथिताः
चपुनः वर्गवर्णेषुयेवर्णास्तेषुक्रममतिक्रम्यैकवृद्ध्याज्ञातव्याइति अननैनतदुक्तंभवति अ२आ ३ इ ४ ई ५ उ ६ ऊ ७ ऋ
८ ॠ ९ ऌ १० ॡ ११ ए १२ ऐ १३ ओ १४ औ १५ अं १६ अः १७ क ३ ख ४ ग ५ घ ६ ङ ७ च ४ छ ५ ज ६ झ ७ ञ ८
ट ५ ठ ६ ड ७ ढ ८ ण ९ त ६।थ ७ द ८ ध ९ न १० प ७ फ ८ ब ९ भ १० म ११ य ८ र ९ ल १० व ११ श ८ ष १० स ११ ह १२ इमे
वर्गवर्णांकाः अथप्रष्टुर्वाग्रुन्यक ६।७।८।९।१०।७।८।९।१०।११।८।९।१०।११।९।१०।११।१२ समाक्षरग्रहणंप्रातिपदिकग्रहणं

॥श्रीगणेशाय नमः॥ सिंदूरारुणगंडवारणमुखं स्वर्गापवर्गप्रदं सर्गान्तःप्रविसर्गहेतुमनिशं गर्भे च गर्गं गुरुं त्रिस्कंधागमवी
जितं त्रिविधिभिर्नत्वा करोम्युज्वलां श्रीगर्गोक्तमनोरमां सुविवृतिं प्रश्नेसतां प्रीतये १ स्थाणोर्दयालोः करुणारसार्द्रां गार्गीं गिरं स्वर्ग
पदीं विचित्रां लोकद्वयाल्हादकरीं पवित्रां विलोकयन्तु क्षितिदेववर्गाः २ अथात्र चतुर्दशविद्यानंतार्थविचारसारामृतास्वादना
त्महाप्रभावज्ञानोदयसच्चिदानन्दाद्वयमना गर्गो मुनिस्त्रिस्कंधागमवेदचक्षुषा विश्वजन्मावनाप्ययनिमित्तभूऽनसाहृ
श्यरूपस्य कालस्यात्मनः सत्वादीनां शीघ्रोच्चपातदेवानां परिगणनया त्रुट्यादिप्रलयांतं कालतन्मानं नाम च विविच्य तन्निर्णी
यार्थमखिलं गणितजालं भूगोलखगोलाद्यनेकयंत्राणि च विस्तराणि परिसमाप्य ततत्कालज्ञानां ब्रह्मादिकीटांतवचसां सदस
त्फलविवेचनार्थमेकविंशतिसूत्रैः प्रश्नविद्यामकरोत् तत्तस्मात्प्रमाणाद्व्ययदर्थे एतावानुपक्रमस्तस्मिन्नस्मदादीनामपि विश्रान्त्या
भूदिति चिंतयंतो गार्गिभानुरिरैभ्यादयश्छात्रवर्गाः परब्रह्मप्रणामात्मकं गर्गमुनिमभिचिंत्य भविष्यदर्थबोधकं प्रश्नमनोरमेति सूत्रं
यन्नोऽस्मत्तदृशाल्पमेधसामप्यवश्यं पठने श्रवणे चातिशये श्रद्धोत्पादकमगपद्यमकं चक्रुः अथेत्यनंतरं गर्गमुनिः प्रश्नविद्या
मकरोदित्यन्वयः किंकृत्वा तं नत्वा तमिति योऽसावादित्ये पुरुषः सोऽसाविति श्रुत्युक्तोयः सः तम् भगवद्गीतायामप्युक्तं इन्द्रिया
णि पराण्याहुरिन्द्रियेभ्यः परं मनः मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः इति अनयोः कर्मयोगसांख्ययोगस्थयोः श्रुतिस्मृत्योर
भेदत्वं वेदांते प्रतिपादितम् तत्वमसि सोऽहमिति महावाक्यमूलात् तं नमस्कृत्वेत्यर्थः अत्र नमः शब्देन गर्गे जीवत्वप्रतिपादि

॥ अथ गार्गमनोरमाटीका प्रारंभः